# PT-2/HALF YEARLY EXAMINATION, 2022-23

## SANSKRIT

Time - 3 Hours | Class - X | M.M. : 80

Date – 14.09.2022 (Wednesday)

Name of the student ______________________ Section ________

**निर्देशाः -**

- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
- प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

## खण्डः - क अपठितांश - अवबोधनम् (10 अङ्काः)

**Q1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखित-**

वर्तमानयुगं संगणकयुगम् अस्ति | अद्यत्वे संगणकस्य प्रयोगः प्रत्येकं क्षेत्रे वर्तते | अद्य नवीनैः वैज्ञानिकैः आविष्कृतेषु साधनेषु संगणकयन्त्रम् अतिमहत्त्वपूर्णम् उपयोगी च अस्ति | जनानां मस्तिष्के ये विचाराः स्मृतिरूपेण स्थाप्यन्ते ते एकस्मिन् एव संगणकयन्त्रे दत्तांशरूपेण क्रूडीकर्तुं शक्यन्ते | अतः सम्प्रति काले संगणकयन्त्रस्य गरिमा दिने दिने वर्धमाना अस्ति | संगणकयन्त्रे अत्यन्तं प्रमुखाः बहूपयोगिनः च विषयाः संगृहीताः भवन्ति | यदि क्रिमिप्रवेशेन संगणकयन्त्रं दोषपूर्णं भवति चेत् तर्हि दत्तांशः पुनः न लभन्ते | इमं दोषं निवारयितुं नूतनं तन्त्रज्ञानम् अधुना 'सेफ्टी टेक्नोलॉजी' इति संस्थया अभिवर्धितम् | संगणकयन्त्रमेव विनष्टं चेदपि अन्तर्जालदारा विश्वेऽस्मिन् यत्र कुत्रापि ते अंशाः पुनर्ग्रहीतुं शक्यन्ते |

**(अ) एकपदेन उत्तरत-** **1x2=2**

i) कस्य गरिमा दिने दिने वर्धमाना अस्ति ?

ii) क्रिमिप्रवेशम् निवारयितुं का संस्था अस्ति ?

**(ब) पूर्णवाक्येन उत्तरत-** **2×2=4**

i) जनानां मस्तिष्के विचाराः केन रूपेण स्थापयन्ते ?

ii) केन संगणकयन्त्रं दोषपूर्णं भवति ?

**(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत |** **1**

**(द) यथानिर्देशम् उत्तरत् -** **1x3=3**

(i) 'नूतनम् तन्त्रज्ञानम्' अनयोः पदयोः विशेषणं किम् ?

(क) प्राचीनम् (ख) नूतनम् (ग) तन्त्रज्ञानम्'

(ii) 'इन्टरनेट' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) संगणकम् (ख) संकलनम् (ग) अन्तर्जालम्

(iii) 'अस्ति' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) विचाराः (ख) विषयः (ग) संगणकयन्त्रम्

## खण्डः - ख रचनात्मककार्यम् - 15 अङ्काः

2. भवान् रमेशः। भवतां विद्यालये संस्कृतसप्ताहः समायोजितः । तत्र संस्कृतसम्भाषण-प्रतियोगितायां भवता प्रथमः पुरस्कारः प्राप्तः । तत् सूचयता स्वमित्रं सुरेशं प्रति अत्र लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनःउत्तरपुस्तिकायां लिखत। **1/2x10=5**

छात्रावासः,१२, मालवीयनगरम्

1 ....................

दिनांकः 14.09.22

प्रिय मित्र 2......................|

सस्नेहं 3..........................

अत्र वयं सर्वे कुशलिनः । अस्माकं विद्यालये गतसप्ताहे संस्कृतसप्ताहः 4...................| तत्र एका सम्भाषण प्रतियोगिता 5......................| अहं तस्यां 6..................प्रथमपुरस्कार प्राप्तवान्। संस्कृतसंभाषणेन 7....................आत्मविश्वासः जागृतः अभवत् | इदानीम् अहम् संस्कृते एव 8...................| भवान् अपि तथा प्रयत्नम् कुर्यात् | पितृभ्याम् नमो नमः |


9................ अभिन्नमित्रम्

10..............................

**मञ्जूषा**

| |
|---|
| **अभिवादनम्, वदामि, रमेशः , सुरेश , दिल्लीतः, अभवत्, मयि, भवतः, समायोजितः, प्रतियोगितायाम्** |

**Q.3 अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत- 1x5=5**



**मञ्जूषा** - इदं, सूर्यः, कुटीरं, ग्रामीणः, चित्रे, प्रातःकाले, महिलाः, वृक्षाः, पर्वताः, अस्ति, ग्रामं, घटः, सन्ति, प्रातःकालस्य, उदेति, जनाः, परितः दृश्यन्ते

Q4. **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत ।** 1x5=5

(i) छात्र विद्यालय से दौड़ कर आ रहा है ।

(ii) एक नगर में एक वृद्धा रहती थी ।

(iii) कल रमेश पाटलिपुत्र जाएगा ।

(iv) बच्चा कुत्ते से डरता है ।

(v) क्या मैं अन्दर आऊं ?

## खण्डः - ग अनुप्रयुक्तव्याकरणम् - 25 अङ्काः

Q5. **अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं संधिविच्छेदं वा कृत्वा लिखत ।** 1x4=4

(i) त्वया महत्कौतुकम् आवेदितं यत् मानुषादपि बिभेषि?

(ii) मयाशीघ्रं तदग्रतः नष्टः ।

(iii) वयः+अनुरोधात् शिशुजनःलालनीयः ।

(iv) अयम् बलीवर्दः अन्येभ्यो दुर्बलः ।

Q6. **अधोलिखितवाक्येषु रेखांकितपदानाम् समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा चिनुत् -** 1x4=4

(i) सुरभिवचनं श्रुत्वा सः विस्मितः ।

(क) सुरभे वचनं (ख) सुरभेः वचनं (ग) सुरभ्या वचनं

(ii) मातापितरौ पूजनीयौ।

(क) मातौ च पितरौ च (ख) माता च पितरौ (ग) माता च पिता च

(iii) कुशः च लवः च रामस्यपुत्रौ ।

(क) कुशलवाः (ख) कुशलवः (ग) कुशलवौ

(iv) अत्र मलानाम् अभावः जलम् नास्ति।

(क) निष्मलं (ख) निर्मलं (ग) निर्मलः

Q7. **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचित उत्तरं प्रदत्तविकल्पेभ्यः चिनुत-** 1x4=4

(i)................... (बल + मतुप) जनाः निर्बलेषु बलप्रयोगं न कुर्युः।

(क) बलवान् (ख) बलवती (ग) बलवन्तः

(ii) ज्ञानस्य ............. (महत् +त्व) को न जानाति ?

(क) महत्त्वं (ख) महत्त्वस्य (ग) महत्त्वो

(iii) शतादीनां सहिष्णुता ।

(क) सहिष्णु + त्व (ख) सहिष्णु + तल् (ग) सहिष्णु + मतुप्

(iv) सर्वेष्वपत्येषु जननी तुल्य<u>वत्सला</u> |

(क) वत्सल + तल्    (ख) वत्सल + टाप्    (ग) वत्सला+ मतुप्

**Q8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत।** **1x3=3**

रमा - त्वं कुत्र गच्छसि ?

सीता - अहं तु आपणं (i)............... ।

रमा - तत्र (ii)............... किमर्थं गम्यते ।

सीता - अहं फलानि क्रेतुं गच्छामि ।

रमा - (iii).............. अपि ततः फलानि आनेतव्यानि ।

| **मञ्जूषा** - मया, गच्छामि, त्वया |
|---|

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत ।**

i) रामः पाठं पठति ।

ii) लतया पुष्पाणि चीयन्ते ।

iii) अहं पत्रं लिखामि ।

**Q9. अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृतपदेषु समयं लिखत-** **1x4=4**

(i) प्रातः (4:30) -------------- वादने अहम् उत्तिष्ठामि ।

(ii) अनन्तरं (5:15) -------------- वादने अहं भ्रमणाय गच्छामि ।

(iii) अनन्तरं (06:45) ------------------- वादने गृहं आगच्छामि ।

(iv) तदनन्तरम् (8:00) ..................... वादने अहं विद्यालयं गच्छामि ।

**Q10 मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत ।** **(1/2×6=3)**

(i) रमा ...................... अशोकनगरम् गमिष्यति ।

(ii) ऋषभः ...................... बिलासपुरम् गतवान् ।

(iii) ...................... वृष्टिः भवति |

(iv) ...................... विदधीत न क्रियाम् |

(v) ...................... मा वद ।

(vi) सुरेशः तु ............... भ्रमति ।

| **मञ्जूषा - उच्चैः, श्वः, ह्यः, सहसा, इतस्ततः, इदानीम्** |
|---|

**Q11 अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत -** **1x3=3**

(i) <u>साधवाः</u> ह्यः प्रवचनं अकुर्वन्।

(क) साधवः    (ख) साधुः    (ग) साधू

(ii) भवन्तः विद्यालयं <u>गच्छति</u> ।

(क) गच्छसि (ख) गच्छतः (ग) गच्छन्ति

(iii) सुरेशः <u>नेत्रयोः</u> पश्यति ।

(क) नेत्रेभ्यः (ख) नेत्राभ्याम् (ग) नेत्रेषु

## खण्डः घ पठित- अवबोधनम् - 30 अङ्काः

**Q12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखित-**

बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत् - गच्छ वत्से! सर्व भद्रं जायेत। अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।।

अपत्येषु च सर्वेषु जननी तुल्यवत्सला।
पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत्।।

**(अ) एकपदेन उत्तरत-** **½x2=1**

(i) सर्वेष्वपत्येषु जननी कीदृशी भवति ?

(ii) कुत्र जलोपप्लवः सञ्जातः ?

**(ब) पूर्णवाक्येन उत्तरत-** **1x2=2**

(i) कृषकः हर्षातिरेकेण किम् अकरोत्?

(ii) सुरभि वचनं श्रुत्वा इन्द्रः किम् अवदत् ?

**(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।** **1x2=2**

(i) 'शीघ्रम्' इति पदस्य पर्यायपदं किम् प्रयुक्तम्?

(क) चिरात् (ख) अचिरात् (ग) चण्डवात

(ii) 'पुत्रे दीने' अत्र विशेष्य पदं किम् अस्ति ?

(क) पुत्रे (ख) दीने (ग) वृषभे

**Q13. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखित-**

किञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्।
प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्।।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।
शुचि पर्यावरणम्।।

**(अ) एकपदेन उत्तरत-** ½x2=1

(i) कविं कस्मात् दूरं नय?

(ii) कविः कति कालपर्यन्तं ग्रामान्ते नेतुं कथयति?

**(ब) पूर्णवाक्येन उत्तरत-** 1x2=2

(i) कविः कुत्र सञ्चरणम् कर्तुं वाञ्छति?

(ii) ग्रामान्ते कविः किं द्रष्टुम् इच्छति?

**(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।** 1x2=2

(i) 'कान्तारे' इति पदस्य विशेषणपदम् किम्?

(क) ग्रामान्ते (ख) एकान्ते (ग) दूरे

(ii) 'जलम्' इति पदस्य समानार्थकपदं किम्?

(क) निर्झर (ख) पयः (ग) पूरम्

**Q14. अधोलिखितं नाद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखित-**

(सिंहासनस्थः रामः । ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ )

विदूषकः - इत इत आर्यौ !

कुशलवौ - ( रामम् उपसृत्य प्रणम्य च ) अपि कुशलं महाराजस्य ?

रामः - युष्मद्दर्शनात् कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य । (परिष्वज्य) अहो हृदयग्राही स्पर्शः ।

(आसनार्धमुपवेषयति)

उभौ - राजासनं खल्वेतत् न युक्तमध्यासितुम् ।

रामः - सव्यवधानं न चारित्रलोपाय । तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम् ।

(अङ्कमुपवेशयति)

उभौ - (अनिच्छां नाटयतः)राजन् ! अलमतिदाक्षिण्येन ।

रामः - अलमतिशालीनतया ।

**(अ) एकपदेन उत्तरत -** ½x2=1

(i) सिंहासने कः स्थः ?

(ii) कुशलवौ कस्य समीपम् अगच्छताम् ?

**(ब) पूर्णवाक्येन उत्तरत-** 1x2=2

(i) कयोः स्पर्शः रामाय हृदयग्राही आसीत् ?

(ii) कुशलवौ रामं प्रणम्य किं अकथयत् ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । 1x2=2

(i) 'पात्रम्' इत्यर्थे किं पदं अत्र प्रयुक्तम् ?

(क) समीपम् (ख) राजासनम् (ग) भाजनम्

(ii) 'तापसौ कुशलवौ' अत्र विशेषणपदं किम् ?

(क) कुशलवौ (ख) अत्र (ग) तापसौ

**Q15. रेखांकितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत-** **1x4=4**

(i) दीने पुत्रे तु माता कृपार्द्रहृदया भवेत् ।

(ii) सः कृच्छ्रेण भारम् उद्वहति ।

(iii) कुशलवयोःवंशस्य कर्त्ता सहस्रदीधितिः ।

(iv) तपोवनवासिनः कुशस्य मातरं देवी इति नाम्ना आह्वयन्ति ।

**Q16 मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकयोः अन्वयं पूरयत |** **½x4=2**

(i) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा,

विश्वास्याद्यैकमानीय कथं यासि वदाधुना।

**अन्वयः** - रे रे धूर्त ! त्वया पुरा (i)....................व्याघ्र (ii)................. दत्तम् । विश्वास्य (अपि) अद्य (iii)....................आनीय कथं यासि इति अधुना (iv)..........................।

(ii) हरिततरूणां ललितलतानां माला रमणीया | **½x4=2**

कुसुमावलिः समीरचालिता स्यान्मे वरणीया ||

नवमालिका रसालं मिलिता रुचिरं संगमनम् |

**अन्वयः**- हरिततरूणां ललित(i)............... रमणीया माला (ii)......................चालिता कुसुमावलिः मे वरणीया स्यात् | (iii).................. नवमालिका (iv)................ संगमनम् मिलिता |

**मञ्जूषा - महयम्,रुचिरम्,त्रयम्,रसालम् वद, समीर,एकम्, लतानाम्**

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितं पदं चित्वा पूरयत -**

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।

अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

**भावार्थः** - यथा सा रूपवती स्त्री निज (i) -------------- प्रभावेण व्याघ्रस्य (ii)-------------- विमुक्ता अभवत् तथैव अस्मिन् संसारे यः (iii)------------- भवति अर्थात् यः बुद्धेः (iv) ---------------- करोति सः अपि महतो भयात् मुच्यते।

**मञ्जूषा- बुद्धिमान्, भयात्, उपयोगम्, बुद्धेः**

**Q17. अधोलिखित - कथांशं समुचितक्रमेण लिखत-** **(½×8=4)**

(i) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः?

(ii) कश्चित् धूर्तः शृगालः हसन् अवदत्।

(iii) त्वं मानुषादपि बिभेषि।

(iv) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुगृहं प्रति चलिता।

(v) भवान् कुतः भयात् पलायितः?

(vi) अयमेकस्तावद्विभज्य भुज्यताम्।

(vii) व्याघ्रः भयाकुलचित्तो नष्टः।

(viii) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**Q18. "क" स्तम्भे लिखितानां पदानां पर्यायपदानि "ख" स्तम्भे लिखितानि सन्ति,तानि यथाक्रमेण मेलयित्वा उचितक्रमं चिनुत |** **1x3=3**

| | क | ख |
|---|---|---|
| (1) | ध्वानम् | करप्रहारेण |
| (2) | चपेटया | समयः |
| (3) | वेला | ध्वनिम् |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुसारं उचितार्थं प्रदत्तविकल्पेभ्यः चिनुत-**

(i) सुरभिवचनं श्रुत्वा <u>भृशम्</u> विस्मितस्याखण्डलस्यापि हृदयमद्रवत् ।

(क) स्वल्पं (ख) अत्यधिकं (ग) मन्दम्

(ii) गच्छ त्वमपि किञ्चित् <u>गूढप्रदेशम्</u> ।

(क) गुप्तप्रदेशम् (ख) नगरम् (ग) ग्रामम्

(iii) "अचिरात् एव चण्डवातेन सह <u>प्रवर्षः</u> समजायत |"

(क) शीघ्रम् (ख) वर्षा (ग) प्रसन्नः